"जगुर्भेद्राणि गन्धर्व्वा नन्तश्च नतुतर्जगुः ॥"
इयं हि पञ्चमकारपूज्यकुलनायिकान्तर्गता। यथा, तन्त्रसारे।
"नटी कापालिनी वेश्या रजकी नापिताङ्गना। ब्राह्मणी शूद्रकन्या च तथा गोपालकन्यका। मालाकारस्य कन्या च नव कन्याः प्रकीर्त्तिताः ॥")

नटेश्वरः, पुं, (नटानामीश्वरः। नृत्यप्रियत्वात् तथात्वम्।) शिवः। इति हेमचन्द्रः।२।११२॥

नड, क भ्रंशे। इति कविकल्पद्रुमः॥ (चुरां-परं-अकं-सेट्।) क, नाडयति। भ्रंशोऽधःपतनम्। इति दुर्गादासः॥

नडः, पुं, (नलतीति। नल+अच्। लस्य डत्वम्।) नलतृणम्। इत्यमरः। २। ४। १६५॥ (यथा, वेदे। ६। १३८। ५।
"यथा नडं कशिपुने स्त्रियो भिन्दन्त्यश्मना॥")
जातिभेदः। इति पुंनपुंसकसंग्रहटीकायां मधुचक्रवर्त्तिरेशः॥

नड्कीयः, त्रि, (नडाः सन्त्यत्र। नड+"नडादीनां कुक् च।" ४। २। ६१। इति छः कुगागमश्च।) नलसमूहदेशः। इति हेमचन्द्रः। ४। २०॥

नड्प्रायः, त्रि, (नडः प्रायेण यत्र।) नलबहुलदेशः। तत्पर्य्यायः। नड्कीयः २ नड्वान् ३ नड्वलः ४। इति हेमचन्द्रः। ४। २०॥

नड्मीनः, पुं, (नलस्थितो मीनः। लस्य डत्वम्।) चिलिचिममत्स्यः। नलमीन इत्यमरदर्शनात् डलयोरैक्यम्॥

नड्संहतिः, स्त्री, (नडानां संहतिः समूहः।) नड्समूहः। तत्पर्य्यायः। नड्या २। इत्यमरः। २। ५। १६८॥ नड्सञ्चयः ३। इति शब्दरत्नावली॥

नड्हः, त्रि, (नडं अपरिस्कृततृणं हन्तीति। हन+डः।) कान्तः। ललितः। इति भूरिप्रयोगः॥

नड्या, स्त्री, (नडानां समूहः। "पाशादिभ्यो यः।" ४। २। ४६। इति यः।) नड्समूहः। इत्यमरः। २। ५। १६८॥

नड्वलः, त्रि, (नडाः सन्त्यत्र। नड+"नड्शादात् ड्वलच्।" ४। २। ८८। इति ड्वलच्।) नलबहुलदेशः। इत्यमरः। २। १। ८॥ (यथा, रघुः। १८। ५।
"यो नड्वलानीव गजः परेषां बलान्यमृद्नान्नलिनाभवक्त्रः॥")

नड्वान्, [त्] त्रि, (नडाः सन्त्यत्र। नड+"कुमुदनड्वेतसेभ्यो ड्मतुप्।" ४। २। ८७। इति ड्मतुप्। डित्वात् टिलोपः। मस्य वः।) नलबहुलदेशः। इत्यमरः। २। १। ८॥

नड्भूः, स्त्री, कुट्टिमः। इति भूरिप्रयोगः॥

नतं, क्ली, (नम+क्तः।) तगरपादी। तगरमूलम्। इति मेदिनी। ते, २८॥ (पर्य्यायोऽस्य यथा,—
"कालानुसारिवावक्रं तगरं कुटिलं शठम्। महोरगं नतं जिह्मं दीनं तगरपादिकम्॥"
इति वैद्यकरत्नमालायाम्॥)

नतः, पुं, (नमति क्षितिं। नम+क्तः।) जन्मनाडिकाविशेषः। तद्यथा,—
"असत्कृतकर्म्मणा येन यान्ति इक्तृत्वतां दिवि। नतोन्नतौ ततः साध्यौ भावाः खेटबलानि षट्॥ दिनार्द्धान्तरिता जन्मनाडिका नतनाडिका। पूर्व्वापरार्द्धे जातस्य प्राक्पराख्या दिने भवेत्॥ रात्रेर्गतघटीशेषघटीदिनार्द्धसंयुता। परपूर्व्वाभिधा ज्ञेया रजन्यां नतनाडिका॥"
इति कोष्ठीप्रदीपः॥

नतः, त्रि, (नम+क्तः।) कुटिलः। नम्रः। इति मेदिनी। ते, २८॥ (यथा, हरिवंशे। २०१। ३६।
"पतन्ति युगपत् सर्व्वे पादयोर्मूर्द्धभिर्नताः॥")

नतद्रुमः, पुं, (नतो द्रुमः।) लताशालः। इति रत्नमाला॥

नतनासिकः, त्रि, (नता नासिका यस्य।) अल्पनासिकायुक्तः। खाँदा इति भाषा। तत्पर्य्यायः। अवटीटः २ अवनाटः ३ अवभ्रटः ४। इत्यमरः। २। ६। ४५॥

नताङ्गी, स्त्री, (नतमङ्गमस्याः। ङीष्।) नारी। इति राजनिर्घण्टः॥

नतिः, स्त्री, (नम+भावे क्तिन्।) नमनम्। नम्रता। यथा,—
"नीतिर्भूमिभुजां नतिर्गुणवतां ह्रीरङ्गनानां धृतिर्दम्पत्योः शिशवो गृहस्य कविता बुद्धेः प्रसादो गिराम्।
लावण्यं वपुषः स्मृतिः सुमनसः शान्तिर्द्विजस्य क्षमा
शक्तस्य द्रविणं गृहाश्रमवतां स्वास्थ्यं सतां मण्डनम्॥"
इति नवरत्नम्॥
(नतिलक्षणादिकन्तु नमस्कारशब्दे द्रष्टव्यम्॥)

नद, टु इ संवृधि। इति कविकल्पद्रुमः॥ (भ्वां-परं-अकं-सेट्।) टु, नन्दथुः। इ, नन्द्यते। संवृधि आनन्दयुक्तभावे। ननन्द पारिप्लवनेत्रया नृपः। नन्दते च कुलं पुंसाम्। इति गणकृतानित्यत्वात्। इति दुर्गादासः॥

नदः, पुं, (नदति प्रवाहवेगेन शब्दायते इति। नद+अच्।) पुंवाचकाख्यविमस्वातावच्छिन्नजलप्रवाहः। (यथा, मनुः। ६। ९०।
"यथा नदीनदाः सर्व्वे सागरे यान्ति संस्थितिम्। तथैवाश्रमिनः सर्व्वे गृहस्थे यान्ति संस्थितिम्॥")
स च सिन्धुभैरवशोणदामोदरब्रह्मपुत्रादिः। तत्पर्य्यायः। पुनर्भवः २ भिद्यः ३ उद्यः ४ सरस्वान् ५। इति हेमचन्द्रः। ४। १५६॥
"अष्टषष्टिस्तु तीर्थानि नदाश्च दशकोटयः॥"
इति पाद्मे भूखण्डे ८५ अध्यायः॥

नदथुः, पुं, (नदतीति। नद+"अथुच् नदेश्च।" उणां ३। ५२। इति अथुच्।) मेघः। इत्युणादिकोषः॥ (यथा ऋग्वेदे। ८। २१। १४।
"यदा कृणोषि नदनुं समूहस्यादित् पितेव हूयसे॥")
सिंहः। इति शब्दमाला॥ (नद+भावे अनुङ्। शब्दः। यथा, ऋग्वेदे। ६। १८। २
"स युध्मः सत्वा खजकृत्समद्वा तुविम्रक्षो नदनुमाँ ऋजीषी॥")

नदी, स्त्री, (नदतीति। नद+अच्। पचादिपाठी नदट् इति निर्देशात् टिड्ढेति ङीप्।) अष्टसहस्रधनुरन्यनद्याप्रतोया। सा च गङ्गायमुनासरस्वतीकावेरीगोदावरीप्रभृतिः। तस्या लक्षणमाह छन्दोगपरिशिष्टम्।
"धनुःसहस्राण्यष्टौ च गतिर्यासां न विद्यते। न ता नदीशब्दवहा गर्त्तास्ताः परिकीर्त्तिताः॥"
इति तिथितत्त्वम्॥
तत्पर्य्यायः। सरित् २ तरङ्गिणी ३ शैवलिनी ४ तटिनी ५ ह्रदिनी ६ धुनी ७ स्रोतस्वती ८ द्वीपवती ९ स्रवन्ती १० निम्नगा ११ आपगा १२। इत्यमरः। १। १०। ३०॥ ह्रादिनी १३ धुनिः १४ स्रोतस्विनी १५ स्रोतोवहा १६ सागरगामिनी १७ अपगा १८। इति भरतः॥ निर्झरिणी १९ सरस्वती २० समुद्रगा २१ कूलङ्कषा २२ कूलवती २३ शैवालिनी २४ सिन्धुः २५ समुद्रकान्ता २६ सागरगा २७ रुध्या २८ रोधोवती २९ वाहिनी ३०। तज्जलगुणाः। स्वच्छत्वम्। लघुत्वम्। दीपनत्वम्। पाचनत्वम्। रुच्यत्वम्। तृष्णापहत्वम्। पथ्यत्वम्। मधुरत्वम्। ईषद्वातलत्वञ्च॥ *॥
"सर्व्वा गुर्व्वी प्राङ्मुखी वाहिनी स्याल्लघ्वी पश्चाद्वाहिनी निश्चयेन।
देशे देशे तद्गुणा सा विशेषाज्ज्ञेया धत्ते गौरवं लाघवञ्च॥
प्रायो मन्दवहा गुर्व्व्यो लघ्व्यः शीघ्रवहाः स्मृताः।
नद्यः पाषाणसिकतावाहिन्यो विमलोदकाः॥
हिमवत्प्रभवा याश्च जलं तास्वमृतोपमम्॥
विन्ध्यात् प्राची प्राच्यवाची प्रतीची
या चोदीची स्यान्नदी सा क्रमेण।
वातारोग्यं श्लेष्मपित्तानिलौघं
पित्तोद्रेकं पथ्यपाकञ्च धत्ते॥
पारियात्रभवा याश्च विन्ध्याख्यप्रभवाश्च याः। शिरोहृद्रोगकुष्ठानां ता हेतुः श्लीपदस्य च॥"
इति राजनिर्घण्टः॥
(यथा च।
"तथा प्राच्यां गमास्त्वन्याः पश्चिमानुगमास्तथा।"
"ससैकता सपाषाणा द्विविधा चाम्बुवाहिनी। एवं चतुर्व्विधा नद्यो वातपित्तकफात्मिकाः॥
सदावहायास्त्वमवद्यसुख्यं
मरुत्कफार्त्तं शमनञ्च तस्याः।
नीरं वसन्ते हितकृद्विशेषात्
नदीभवं नैव हिमागमे च॥
घनविमलशिलानां स्फालनाञ्जातफेनं बहुलसजलवीचिच्छन्नसंक्षोभदम्।